# શ્રીગુરુપાદુકાસ્તોત્રમ્ ૨

Shri Gurupadukastotram 2

sanskritdocuments.org

November 10, 2018

# Shri Gurupadukastotram 2

# શ્રીગુરુપાદુકાસ્તોત્રમ્ ૨

## Sanskrit Document Information

Text title : gurupAdukAstotram 2

File name : gurupAdukAstotram2.itx

Category : deities_misc, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, gurudeva

Location : doc_deities_misc

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# Shri Gurupadukastotram 2

# શ્રીગુરુપાદુકાસ્તોત્રમ્ ૨

નાલીકનીકાશપદાદૃતાભ્યાં નારીવિમોહાદિનિવારકાભ્યામ્ ।
નમજ્જનાભીષ્ટતતિપ્રદાભ્યાં નમો નમઃ શ્રીગુરુપાદુકાભ્યામ્ ॥ ૧॥

શમાદિષટ્કપ્રદવૈભવાભ્યાં સમાધિદાનવ્રતદીક્ષિતાભ્યામ્ ।
રમાધવાઙ્ઘ્રિસ્થિરભક્તિદાભ્યાં નમો નમઃ શ્રીગુરુપાદુકાભ્યામ્ ॥ ૨॥

નૃપાલિમૌલિવ્રજરત્નકાન્તિસરિદ્વિરાજજ્ઝષકન્યકાભ્યામ્ ।
નૃપત્વદાભ્યાં નતલોકપઙ્ક્તેર્નમો નમઃ શ્રીગુરુપાદુકાભ્યામ્ ॥

અનન્તસંસારસમુદ્રતારનૌકાયિતાભ્યાં ગુરુભક્તિદાભ્યામ્ ।
વૈરાગ્યસામ્રાજ્યદપૂજનાભ્યાં નમો નમઃ શ્રીગુરુપાદુકાભ્યામ્ ॥ ૪॥

પાપાન્ધકારાર્કપરમ્પરાભ્યાં તાપત્રયાહીન્દ્રખગેશ્વરાભ્યામ્ ।
જાડ્યાબ્ધિસંશોષણબાડવાભ્યાં નમો નમઃ શ્રીગુરુપાદુકાભ્યામ્ ॥ ૫॥

કવિત્વવારાશિનિશાકરાભ્યાં દારિદ્ર્યદાવામ્બુદમાલિકાભ્યામ્ ।
દૂરીકૃતાનમ્રવિપત્તતિભ્યાં નમો નમઃ શ્રીગુરુપાદુકાભ્યામ્ ॥ ૬॥

નતા યયોઃ શ્રીપતિતાં સમીયુઃ કદાચિદપ્યાશુ દરિદ્રવર્યાઃ ।
મૂકશ્ચ વાચસ્પતિતાં હિ તાભ્યાં નમો નમઃ શ્રીગુરુપાદુકાભ્યામ્ ॥ ૭॥

કામાદિસર્પવ્રજભઞ્જકાભ્યાં વિવેકવૈરાગ્યનિધિપ્રદાભ્યામ્ ।
બોધપ્રદાભ્યાં દ્રુતમોક્ષદાભ્યાં નમો નમઃ શ્રીગુરુપાદુકાભ્યામ્ ॥ ૮॥

સ્વાર્ચાપરાણામખિલેષ્ટદાભ્યાં સ્વાહાસહાયાક્ષધુરન્ધરાભ્યામ્ ।
સ્વાન્તાચ્છભાવપ્રદપૂજનાભ્યાં નમો નમઃ શ્રીગુરુપાદુકાધ્યામ્ ॥ ૯॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીગુરુપાદુકાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Gurupadukastotram 2*

pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*